श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ पञ्चपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चपञ्चाशः सर्गः ॥

## राज्ञो निमेर्वसिष्ठस्य च मिथः शापेन देहत्यागः

एष ते नृगशापस्य विस्तरोऽभिहितो मया।
यद्यस्ति श्रवणे श्रद्धा शृणुष्वेहापरां कथाम्॥ 7.55.1 ॥

एवमुक्तस्तु रामेण सौमित्रिः पुनरब्रवीत्।
तृप्तिराश्चर्यभूतानां कथानां नास्ति मे नृप॥ 7.55.2 ॥

लक्ष्मणेनैवमुक्तस्तु राम इक्ष्वाकुनन्दनः।
कथां परमधर्मिष्ठां व्याहर्तुमुपचक्रमे॥ 7.55.3 ॥

आसीद् राजा निमिर्नाम इक्ष्वाकूणां महात्मनाम्।
पुत्रो द्वादशमो वीर्ये धर्मे च परिनिष्ठितः॥ 7.55.4 ॥

स राजा वीर्यसम्पन्नः पुरं देवपुरोपमम्।
निवेशयामास तदा अभ्याशे गौतमस्य तु॥ 7.55.5 ॥

पुरस्य सुकृतं नाम वैजयन्तमिति श्रुतम्।
निवेशं यत्र राजर्षिर्निमिश्चक्रे महायशाः॥ 7.55.6 ॥

तस्य बुद्धिः समुत्पन्ना निवेश्य सुमहापुरम्।
यजेयं दीर्घसत्रेण पितुः प्रह्लादयन् मनः॥ 7.55.7 ॥

ततः पितरमामन्त्र्य इक्ष्वाकुं हि मनोः सुतम्।
वसिष्ठं वरयामास पूर्वं ब्रह्मर्षिसत्तमम्॥ **7.55.8** ॥

अनन्तरं स राजर्षिर्निमिरिक्ष्वाकुनन्दनः।
अत्रिमङ्गिरसं चैव भृगुं चैव तपोनिधिम्॥ **7.55.9** ॥

तमुवाच वसिष्ठस्तु निमिं राजर्षिसत्तमम्।
वृतोऽहं पूर्वमिन्द्रेण अन्तरं प्रतिपालय॥ **7.55.10** ॥

अनन्तरं महाविप्रो गौतमः प्रत्यपूरयत्।
वसिष्ठोऽपि महातेजा इन्द्रयज्ञमथाकरोत्॥ **7.55.11** ॥

निमिस्तु राजा विप्रांस्तान् समानीय नराधिपः।
अयजद्धिमवत्पार्श्वे स्वपुरस्य समीपतः।
पञ्चवर्षसहस्राणि राजा दीक्षामथाकरोत्॥ **7.55.12** ॥

इन्द्रयज्ञावसाने तु वसिष्ठो भगवानृषिः।
सकाशमागतो राज्ञो हौत्रं कर्तुमनिन्दितः॥ **7.55.13** ॥

तदन्तरमथापश्यद् गौतमेनाभिपूरितम्।
कोपेन महताविष्टो वसिष्ठो ब्रह्मणः सुतः॥ **7.55.14** ॥

स राज्ञो दर्शनाकाङ्क्षी मुहूर्तं समुपाविशत्।
तस्मिन्नहनि राजर्षिर्निद्रयापहृतो भृशम्॥ **7.55.15** ॥

ततो मन्युर्वसिष्ठस्य प्रादुरासीन्महात्मनः।
अदर्शनेन राजर्षेर्व्याहर्तुमुपचक्रमे॥ **7.55.16** ॥

यस्मात् त्वमन्यं वृतवान् मामवज्ञाय पार्थिव।
चेतनेन विनाभूतो देहस्ते पार्थिवैष्यति॥ **7.55.17** ॥

ततः प्रबुद्धो राजा तु श्रुत्वा शापमुदाहृतम्।
ब्रह्मयोनिमथोवाच स राजा क्रोधमूर्च्छितः॥ **7.55.18** ॥

अजानतः शयानस्य क्रोधेन कलुषीकृतः।
उक्तवान् मम शापाग्निं यमदण्डमिवापरम्॥ **7.55.19** ॥

तस्मात् तवापि ब्रह्मर्षे चेतनेन विनाकृतः।
देहः स सुचिरप्रख्यो भविष्यति न संशयः॥ **7.55.20** ॥

इति रोषवशादुभौ तदानी -
मन्योन्यं शपितौ नृपद्विजेन्द्रौ।
सहसैव बभूवतुर्विदेहौ
तत्तुल्याधिगतप्रभाववन्तौ॥ **7.55.21** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चपञ्चाशः सर्गः॥